श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री उज्ज्वलवेङ्कटनाथस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री उज्ज्वलवेङ्कटनाथस्तोत्रम् ॥

रङ्गे तुङ्गे कवेराचलजकनकनद्यन्तरङ्गे भुजङ्गे
शेषे शेषे विचिन्वन् जगदवननयं भात्यशेषेऽपि दोषे।
निद्रामुद्रां दधानो निखिलजनगुणध्यानसान्द्रामतन्द्रां
चिन्तां यां तां वृषाद्रौ विरचयसि रमाकान्त कान्तां शुभान्ताम्॥ १ ॥

तां चिन्तां रङ्गक्लृप्तां वृषगिरिशिखरे सार्थयन् रङ्गनाथ
श्रीवत्सं वा विभूषां व्रणकिणमहिराट्सूरिक्लृप्तापराधम्।
धृत्वा वात्सल्यमत्युज्ज्वलयितुमवने सत्क्रतौ बद्धदीक्षो
बध्नन्स्वीयाङ्घ्रियूपे निखिलनरपशून् गौणरज्ज्वाऽसि यज्वा॥ २ ॥

ज्वालारावप्रनष्टासुरनिवहमहाश्रीरथाङ्गाब्जहस्तं
श्रीरङ्गे चिन्तितार्थान्निजजनविषये योक्तुकामं तदर्हान्।
द्रष्टुं दृष्टया समन्ताज्जगति वृषगिरेस्तुङ्गशृङ्गाधिरूढं
दुष्टादुष्टानवन्तं निरुपधिकृपया श्रीनिवासं भजेऽन्तः॥ ३ ॥

अन्तः कान्तश्श्रियो नस्सकरुणविलसद्दृक्तरङ्गैरपाङ्गैः
सिञ्चन्मुञ्चन्कृपाम्भःकणगणभरितान्प्रेमपूरानपारान्।
रूपं चापादचूडं विशदमुपनयन् पङ्कजाक्षं समक्षं
धत्तां हृत्तापशान्त्यै शिशिरमृदुलतानिर्जिताब्जे पदाब्जे॥ ४ ॥

अब्जेन सदृशि सन्ततमिन्धे हृत्पुण्डरीककुण्डे यः।
जडिमार्त आश्रयेऽद्भुतपावकमेतं निरिन्धनं ज्वलितम्॥ ५ ॥

ज्वलितनानानागशृङ्गगमणिगणोदितसुपरभागक
घननिभाभाभासुराङ्गक वृषगिरीश्वर वितर शं मम।
सुजनतातातायिताखिलहितसुशीतलगुणगणालय
विसृमरारारादुदित्वररिपुभयङ्करकरसुदर्शन॥ ६ ॥

www.prapatti.com

सकलपापापारभीकरघनरवाकरसुदर सादरम्
अवतु मामामाघसम्भृतमगणनोचितगुण रमेश्वर।
तव कृपा पापाटवीहतिदवहुताशनसमहिमा ध्रुवम्
इतरथाथाथारमस्त्यघगणविमोचनमिह न किञ्चन॥ ७ ॥

नगधराराराधने तव वृषगिरीश्वर य इह सादर-
रचितनानानामकौसुमतरुलसन्निजवनविभागज।
सुमकृतां तां तां शुभस्रजमुपहरन् सुखमहिपतिर्गुरुः
अतिरयायायासदायकभवभयानकशठरिपोः किल॥ ८ ॥

निगमगा गा गायता यतिपरिबृढेन तु रचय पुरुष
जितसभो भो भोगिराङ्गिरिपतिपदार्चनमिति नियोजितः।
इह परं रम्रम्यते स्म च तदुदितव्रणचुबुकभूषणे
इह रमे मे मेघरोचिषि भवति हारिणि हृदयरङ्ग॥ ९ ॥

गतभये ये ये पदे तव रुचियुता भुवि वृषगिरीश्वर
विदधते ते ते पदार्चनमितरथा गतिविरहिता इति।
मतिमता तातायिते त्वयि शरणतां हृदि कलयता परि-
चरणया यायाऽऽयता तव फणिगणाधिपगुरुवरेण तु॥ १० ॥

विरचितां तान्तां वनावलिमुपगते त्वयि विहरति द्रुम-
नहनगाङ्गां गामिव श्रियमरचयत्तव स गुरुरस्य च।
तदनु तान्तां तां रमां परिजनगिरा द्रुतमवयतो निज-
शिशुदशाशाशालिनीमपि वितरतो वर वितर शं मम॥ ११ ॥

ममतया यायाऽऽविला मतिरुदयते मम सपदि तां हर
करुणया याया शुभा मम वितर तामयि वृषगिरीश्वर।
सदुदयायायासमृच्छसि न दरमप्यरिविदलनादिषु
मदुदयायायासमीप्ससि न तु कथं मम रिपुजयाय च॥ १२ ॥

मयि दयाया यासि केन तु न पदतां ननु निगद तन्मम
मम विभो भो भोगिनायकशयन मे मतमरिजयं दिश।

www.prapatti.com

परम यायाया या दया तव निरवधिं मयि झटिति तामयि
सुमहिमा मा माधव क्षतिमुपगमत्तव मम कृतेऽनघ॥ १३ ॥

घटितपापापारदुर्भटपटलदुर्घटनिधनकारण
रणधरारारात्पलायननिजनिदर्शितबहुबलायन।
दरवरारारावनाशन मधुविनाशन मम मनोधन
रिपुलयायायाहि पाहि न इदमरं मम कलय पावन॥ १४ ॥

सुतरसासासारदृक्ततिरतिशुभा तव निपततान्मयि
सहरमो मोमोत्तु सन्ततमयि भवान्मयि वृषगिरावपि।
प्रतिदिनं नन्नम्यते मम मन उपेक्षिततदपरं त्वयि
तदरिपापापासनं कुरु वृषगिरीश्वर सततमुज्ज्वल॥ १५ ॥

उज्ज्वलवेङ्कटनाथस्तोत्रं पठतां ध्रुवाऽरिविजयश्रीः।
श्रीरङ्गोक्तं लसति यदमृतं सारज्ञहृदयसारङ्गे॥ १६ ॥

॥ इति श्री उज्ज्वलवेङ्कटनाथस्तोत्रं सम्पूर्णम् ॥

www.prapatti.com